25/2023

**Roll No.** | | | | | | | | |

(Write Roll Number from left side exactly as in the Admit Card)

*Signature of Invigilator*

**Question Booklet Series** **X**

**PAPER–II** **Question Booklet No.**

**Subject Code : 03**

# SANSKRIT

*Time : 2 Hours* *Maximum Marks: 200*

***Instructions for the Candidates***

1. Write your Roll Number in the space provided on the top of this page as well as on the OMR Sheet provided.
2. At the commencement of the examination, the question booklet will be given to you. In the first 5 (five) minutes, you are requested to open the booklet and verify it:
   - (i) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page.
   - (ii) Faulty booklet, if detected, should be got replaced immediately by a correct booklet from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given.
   - (iii) Verify whether the Question Booklet No. is identical with OMR Answer Sheet No.; if not, the full set is to be replaced.
   - (iv) After this verification is over, the Question Booklet Series and Question Booklet Number should be entered on the OMR Sheet.
3. This paper consists of One Hundred (100) multiple-choice type questions. All the questions are compulsory. Each question carries *two* marks.
4. Each Question has four alternative responses marked: (A) (B) (C) (D) . You have to darken the circle as indicated below on the correct response against each question.
   *Example:* (A) (B) ● (D) , where (C) is the correct response.
5. Your responses to the questions are to be indicated correctly in the OMR Sheet. If you mark your response at any place other than in the circle in the OMR Sheet, it will not be evaluated.
6. Rough work is to be done at the end of this booklet.
7. If you write your Name, Phone Number or put any mark on any part of the OMR Sheet, except in the space allotted for the relevant entries, which may disclose your identity or use abusive language or employ any other unfair means, such as change of response by scratching or using white fluid, you will render yourself liable to disqualification.
8. Do not tamper or fold the OMR Sheet in any way. If you do so, your OMR Sheet will not be evaluated.
9. You have to return the Original OMR Sheet to the invigilator at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are, however, allowed to carry question booklet and duplicate copy of OMR Sheet after completion of examination.
10. **Use only Black Ball point pen.**
11. **Use of any calculator, mobile phone, electronic devices/gadgets etc. is strictly prohibited.**
12. **There is no negative marks for incorrect answer.**

***परीक्षार्थिनां कृते निर्देशावली***

1. एतत्पत्रोपरि समं च प्रदत्ते OMR-पत्रमध्ये निर्दिष्टस्थले भवतः/भवत्या क्रमसंख्या लेख्या।
2. परीक्षारम्भे प्रश्नपुस्तिका भवते/भवत्यै प्रदास्यते। प्रथमनिमेषपञ्चके पुस्तिकामुद्धाटयितुं तथा एतस्य याथार्थ्यं परीक्षितुं भवान्/भवती अनुरुध्यते।
   - (a) प्रश्नपुस्तिकाभ्यन्तरं द्रष्टुम् एतत्प्रच्छदपत्रस्य प्रान्तभागोपरिस्थिता पत्रमुद्रा छेदनीया।
   - (b) त्रुटियुक्ता पुस्तिका दृष्टा चेत् परीक्षानिरीक्षकात् प्राप्तया शुद्धपुस्तिकया अविलम्बेन पञ्चनिमेषमध्ये सा प्रतिस्थापनीया। ततः परं प्रश्नपुस्तिकाप्रतिस्थापनं न भवेत्, नापि च अतिरिक्तः समयः प्रदास्यते।
   - (c) प्रश्नपुस्तिकासंख्या OMR-उत्तरपत्रसंख्यानुरूपा न वेति परीक्षणीयम्। न चेत् सम्पूर्णः गुच्छः प्रतिस्थापनीयः।
   - (d) यथार्थतापरीक्षावसाने प्रश्नपुस्तिकाश्रेणीसंख्या तथा प्रश्नपुस्तिकासंख्या OMR-पत्रमध्ये निवेशनीया।
3. पत्रमिदं शतसंख्यकबहुचयनीयविकल्पोत्तरकप्रश्नसमन्वितम्। सर्वे प्रश्नाः अवश्यमुत्तरणीयाः। प्रत्येकं प्रश्नः अङ्कद्वयमानकः।
4. प्रत्येकं प्रश्नस्य चत्वारः उत्तरविकल्पाः सन्ति। ते हि (A) (B) (C) (D) इत्येवं चिह्निताः। प्रत्येकं प्रश्नस्य कृते शुद्धोत्तरसमन्वितं वृत्तम् अधोदर्शितरीत्या कृष्णीकर्तव्यम्। उदाहरणम्: (A) (B) ● (D) , यत्र (C) इति शुद्धोत्तरम्।
5. प्रतिप्रश्नं भवदुत्तरं यथायथतया OMR-पत्रमध्ये निर्देष्टव्यम्। OMR-पत्रमध्ये निर्दिष्टवृत्तमतिरिच्य अन्यत्र कुत्रापि भवदुत्तरं निधीयते चेत् तत् परीक्षार्थं विवेचितं न स्यात्।
6. आवश्यकत्वे सति उत्तरस्य स्थूलरूपनिर्माणानुकूलं कार्यं पुस्तिकायाः अन्तिमभागे विधातव्यम्।
7. प्रासङ्गिकतथ्योल्लेखाय निर्दिष्टं स्थानं विहाय OMR-पत्रमध्ये अन्यत्र कुत्रापि भवतः/भवत्याः नाम दूरभाषसंख्या अन्यत् वा किमपि भवत्परिचयप्रकाशकं चिह्नं भवता/भवत्या निधीयते चेत्, निन्दनीया भाषा वा प्रयुज्यते चेत्, नखघर्षणेन श्वेतद्रवेण वा उत्तरपरिवर्तनम् इत्येवंरूपः कोऽप्यन्यः असदुपायः वा उपयुज्यते चेत् भवान्/भवती स्वयमेव स्वायोग्यतां सूचयिष्यति।
8. OMR-पत्रं न कथमपि विकर्तव्यं नापि वा भङ्ग्या पुटीकर्तव्यम्। एवं क्रियते चेत् भवतः/भवत्याः OMR-पत्रं न परीक्षिष्यते।
9. परीक्षावसाने भवता/भवत्या अवश्यमेव भवदीयं प्रकृतं OMR-पत्रं परीक्षानिरीक्षकाय प्रत्यर्पणीयम्। परीक्षाप्रकोष्ठात् बहिस्तु तद् आत्मना सह नैव नेतव्यम्। परं परीक्षासमाप्तेरनन्तरं प्रश्नपुस्तिकां तथा OMR-पत्रस्य प्रतिलिपिं नेतुमनुमतिरस्ति।
10. **केवलं वर्तुलाग्रा कृष्णमसिः लेखनी उपयोक्तव्या।**
11. **गणकयन्त्रम्, दूरभाषयन्त्रम्, यत् किमपि वैद्युतिकयन्त्रम् इत्यादेः उपयोगः कठोरतया प्रतिषिद्धः।**
12. **असदुत्तरहेतोः अङ्कवियोजननीतिर्नास्ति।**

## PAPER II
## (SANSKRIT)

**1.** पैप्पलादशाखा कस्य वेदस्य भवति?
(A) ऋग्वेदस्य
(B) यजुर्वेदस्य
(C) सामवेदस्य
(D) अथर्ववेदस्य

**2.** पुरुषसूक्तम् ऋग्वेदस्य कस्मिन् मण्डले विद्यते?
(A) सप्तमे
(B) अष्टमे
(C) नवमे
(D) दशमे

**3.** कः देवः पवमानः?
(A) इन्द्रः
(B) वरुणः
(C) सोमः
(D) विष्णुः

**4.** दशतयी इति उच्यते–
(A) ऋक्संहिता
(B) कृष्णयजुर्वेदसंहिता
(C) सामवेदसंहिता
(D) अथर्ववेदसंहिता

**5.** सरमा–पणिसंवादसूक्तं दृश्यते ऋग्वेदस्य कस्मिन् मण्डले?
(A) षष्ठे
(B) अष्टमे
(C) नवमे
(D) दशमे

**6.** षड्विंशब्राह्मणं कस्य वेदस्य भवति?
(A) ऋग्वेदस्य
(B) यजुर्वेदस्य
(C) सामवेदस्य
(D) अथर्ववेदस्य

**7.** अध्वर्युः कस्य वेदस्य ऋत्विक्?
(A) ऋग्वेदस्य
(B) यजुर्वेदस्य
(C) सामवेदस्य
(D) अथर्ववेदस्य

**8.** किं वेदाङ्गं वेदपुरुषस्य घ्राणम्?
(A) कल्पः
(B) ज्योतिषम्
(C) शिक्षा
(D) निरुक्तम्

**9.** ''विद्ययाऽमृतमश्नुते'' इति मन्त्रांशः कुत्र उपलभ्यते?
(A) ईशावास्योपनिषदि
(B) कठोपनिषदि
(C) केनोपनिषदि
(D) तैत्तिरीयोपनिषदि

**10.** ''बुद्धिं तु सारथिं विद्धि''– इति मन्त्रांशोऽस्ति
(A) तैत्तिरीयोपनिषदि
(B) कठोपनिषदि
(C) बृहदारण्यकोपनिषदि
(D) मुण्डकोपनिषदि

**11.** यास्कानुसारम् ऋच: कतिविधा:?

(A) द्विविधा:

(B) त्रिविधा:

(C) चतुर्विधा:

(D) पञ्चविधा:

**12.** ''तन्मे मन: शिवसङ्कल्पमस्तु''– शिवसङ्कल्पम् इत्यत्र समास: क:?

(A) कर्मधारय:

(B) बहुव्रीहि:

(C) तत्पुरुष:

(D) द्वन्द्व:

**13.** वानप्रस्थाश्रमेण किं सम्बद्धम्?

(A) संहिता

(B) ब्राह्मणम्

(C) आरण्यकम्

(D) उपनिषद्

**14.** निरुक्तमते वैश्वानर: क:?

(A) विष्णु:

(B) रुद्र:

(C) सविता

(D) अग्नि:

**15.** ''ऋग्वेदादिभाष्यभूमिका'' नाम ग्रन्थस्य कर्ता–

(A) स्वामी दयानन्द:

(B) सायणाचार्य:

(C) वेङ्कटमाधवाचार्य:

(D) मुद्गलाचार्य:

**16.** अधोलिखितेषु क: वेदस्य कालनिर्णये ज्योति:–शास्त्रमनुससार?

(A) मैक्स्मूलर्महोदय:

(B) स्वामी दयानन्द:

(C) भिन्टार्नित्स्महाभाग:

(D) बालगङ्गाधरतिलकमहोदय:

**17.** 'अक्षास:' इति वैदिकपदस्य लौकिकरूपं स्यात्–

(A) अक्ष:

(B) अक्षै:

(C) अक्षा:

(D) अक्षान्

**18.** दर्शपूर्णमासेष्टि: इति यागकर्म–

(A) नित्यम्

(B) नैमित्तिकम्

(C) प्रायश्चित्तम्

(D) उपस्थानम्

**19.** अधोलिखितानां समीचीनां तालिकां चिनुत–

| | | | |
|---|---|---|---|
| (a) | कृष्णयजुर्वेद: | (1) | माध्यन्दिनसंहिता |
| (b) | शुक्लयजुर्वेद: | (2) | शौनकसंहिता |
| (c) | अथर्ववेद: | (3) | कौषीतकिब्राह्मणम् |
| (d) | ऋग्वेद: | (4) | मैत्रायणीसंहिता |

कूट:

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | (4) | (1) | (2) | (3) |
| (B) | (4) | (2) | (1) | (3) |
| (C) | (4) | (1) | (3) | (2) |
| (D) | (4) | (3) | (2) | (1) |

**20.** अनुष्टुप्छन्दसि प्रतिपादम् सामान्यत: अक्षराणि–

(A) सप्त

(B) अष्टौ

(C) नव

(D) दश

**21.** कः 'पूर्वेषामपि गुरूः कालेनानवच्छेदात्'?
(A) कपिलः
(B) कृष्णः
(C) पतञ्जलिः
(D) ईश्वरः

**22.** अन्वयव्याप्तेरूदाहरणं भवति
(A) यत्राग्निस्तत्र धूमः
(B) यत्र पर्वतस्तत्र धूमः
(C) यत्र धूमस्तत्राग्निर्यथा महानसे
(D) त्रिषु किमपि न

**23.** प्रमाणं द्विविधमिति कस्य मतम्?
(A) मीमांसकस्य
(B) नैयायिकस्य
(C) वैशेषिकस्य
(D) पौराणिकस्य

**24.** महत्-अहंकार-पञ्चतन्मात्राणि च सन्ति
(A) विकृतिषु
(B) प्रकृतौ
(C) अविकृतिषु
(D) प्रकृतिविकृतिषु

**25.** सांख्यमते संसरति बध्यते मुच्यते च
(A) बुद्धिः
(B) विकृतिः
(C) पुरुषः
(D) प्रकृतिः

**26.** अज्ञातार्थज्ञापको वेदभागः भवति
(A) मन्त्रः
(B) नामधेयः
(C) विधिः
(D) अर्थवादः

**27.** योगसूत्रे प्रणवः कस्य वाचकः?
(A) ईश्वरस्य
(B) वेदस्य
(C) पुरुषस्य
(D) सर्वेषाम्

**28.** व्याप्यारोपेण व्यापकारोपः
(A) तर्कः
(B) विपर्ययः
(C) संशयः
(D) परामर्शः

**29.** अधोलिखितेषु कः न बौद्धसिद्धान्तः?
(A) प्रतीत्यसमुत्पादवादः
(B) क्षणिकवादः
(C) अनात्मवादः
(D) सत्कार्यवादः

**30.** सत्त्वरजस्तमसां साम्यावस्था किमुच्यते?
(A) अहङ्कारः
(B) मूलप्रकृतिः
(C) बुद्धिः
(D) कैवल्यम्

**31.** विनियोगविधेः सहकारिभूतेषु प्रमाणेषु न अन्तर्भूतम्

(A) श्रुतिः

(B) लिङ्गम्

(C) वाक्यम्

(D) परिसंख्या

**32.** तर्कसंग्रहमते 'एकस्मिन् धर्मिणि भावाभावावगाहि ज्ञानम्' इति लक्षणं भवति

(A) शब्दज्ञानस्य

(B) विपर्ययस्य

(C) संशयस्य

(D) अज्ञानस्य

**33.** अयथार्थानुभवस्य भेदाः

(A) संशयः, सन्देहः, अनिर्णयश्च

(B) संशयः, विपर्ययः, तर्कश्च

(C) संशयः, निर्णयः, विवादश्च

(D) असंशयः, सरलः, भ्रमश्च

**34.** योगसूत्रानुसारेण समीचीनं क्रमं चिनुत

(A) अहिंसा–सत्यास्तेयापरिग्रह–ब्रह्मचर्याणि

(B) अहिंसा–सत्यापरिग्रह–ब्रह्मचर्यास्तेयानि

(C) सत्याहिंसापरिग्रहास्तेयब्रह्मचर्याणि

(D) अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः

**35.** षट्कसम्पत्तिमध्ये कस्य गणना न भवति?

(A) मोक्षेच्छा

(B) तितिक्षा

(C) समाधानम्

(D) श्रद्धा

**36.** मतिश्रुतावधिमनःपर्यायकेवलभेदेन ज्ञानं पञ्चविधम् इति मतं केन दर्शनेन स्वीकृतम्?

(A) रामानुजदर्शनेन

(B) बौद्धदर्शनेन

(C) योगदर्शनेन

(D) आर्हतदर्शनेन

**37.** तन्तुरूपं पटरूपं प्रति किं कारणम्?

(A) समवायिकारणम्

(B) असमवायिकारणम्

(C) निमित्तकारणम्

(D) असाधारणं कारणम्

**38.** अन्नम्भट्टेन केषां मतमवलम्ब्य तर्कसंग्रहो रचितः?

(A) गौतमजैमिनीमतमवलम्ब्य

(B) कणादपाणिनीयमतम् अवलम्ब्य

(C) केवलं स्वमतमवलम्ब्य

(D) कणादन्यायमतम् अवलम्ब्य

**39.** शङ्कराचार्येण रचितं ब्रह्मसूत्रभाष्यं केन नाम्ना परिचीयते?

(A) गोविन्दभाष्यम्

(B) श्रीभाष्यम्

(C) शारीरकभाष्यम्

(D) वात्स्यायनभाष्यम्

**40.** तर्कसंग्रहकारमते आत्मनः लक्षणं भवति

(A) चैतन्याधिकरणम्

(B) ज्ञानाधिकरणम्

(C) विज्ञानाधिकरणम्

(D) देहाधिकरणम्

**41.** एकाल्प्रत्ययः __________ ।

(A) निष्ठा

(B) सत्

(C) अपृक्तः

(D) प्रगृह्यः

**42.** निष्ठापदेन कौ गृह्येते?

(A) शतृशानचौ

(B) अज्घञौ

(C) क्तक्तवतू

(D) घञपौ

**43.** अलिङ्गाः कस्य उदाहरणम्?

(A) प्रातिपदिकार्थमात्रस्य

(B) लिङ्गमात्रस्य

(C) परिमाणमात्रस्य

(D) वचनमात्रस्य

**44.** फलेभ्यो याति– फलेभ्यः– इत्यत्र चतुर्थीविभक्तेः कारणम् भवति।

(A) तुमर्थाच्च भाववचनात्

(B) तादर्थ्ये

(C) क्रियार्थोपपदस्य च कर्मणि स्थानिनः

(D) उत्पातेन ज्ञापिते च

**45.** द्वन्द्वतत्पुरुषयोः लिङ्गं सामान्यतः कीदृशं स्यात्?

(A) पूर्ववत्

(B) परवत्

(C) नपुंसकम्

(D) पुंलिङ्गम्

**46.** यूपदारु – अत्र चतुर्थी केन समस्यते?

(A) अर्थेन

(B) हितेन

(C) रक्षितेन

(D) तदर्थेन

**47.** 'चक्रेण युगपत्'– अत्र समस्तपदम् स्यात्

(A) युगपच्चक्रम्

(B) अनुचक्रम्

(C) अभिचक्रम्

(D) सचक्रम्

**48.** 'रामेण' इति पदे णत्वविधायकं सूत्रं किम्?

(A) आदेशप्रत्यययोः

(B) वावसाने

(C) अट्कुप्वाङ्नुम्व्यवायेऽपि

(D) इण्कोः

**49.** वारिशब्दस्य प्रथमायाः रूपाणि–

(A) वारिः, वारिणी, वारीणि

(B) वारि, वारीणि, वारिणी

(C) वारि, वारिणी, वारीणि

(D) वारि, वारिणा, वारीणि

**50.** 'भवामि' इति रूपसिद्धये केन सूत्रेण प्रयोजनम् अस्ति?

(A) अतो दीर्घो यञि

(B) वृद्धिरेचि

(C) अकः सवर्णे दीर्घः

(D) अतो गुणे

**51.** 'भवन्ति' इति केन सूत्रेण सिध्यते?
(A) झेर्जुस्
(B) झोऽन्तः
(C) झलां जश् झशि
(D) उस्यपदान्तात्

**52.** एधाञ्चकार इति रूपं भवति–
(A) लट्लकारे
(B) लिट्लकारे
(C) लोट्लकारे
(D) लृट्लकारे

**53.** केन सूत्रेण आत्मनेपदत्वं विधीयते?
(A) शेषः परस्मैपदम्
(B) धातोः
(C) तिङ्शित्सार्वधातुकम्
(D) अनुदात्तङित आत्मनेपदम्

**54.** 'राजन्' इत्यत्र किं टि?
(A) न्
(B) जन्
(C) अन्
(D) ज

**55.** 'मुनि' इतिशब्दस्य का संज्ञा?
(A) घः
(B) भम्
(C) घि
(D) घु

**56.** वि–जि लटि प्रथमपुरुषे द्विवचने रूपम्–
(A) विजयति
(B) विजयेत
(C) विजयताम्
(D) विजयेते

**57.** वि–रम्- लोटि प्रथमपुरुषे बहुवचने रूपम्–
(A) विरमन्ताम्
(B) विरमन्ते
(C) विरमन्तु
(D) विरमाम

**58.** कृत्यप्रत्ययमध्ये कः गृह्यते?
(A) घञ्
(B) अच्
(C) शानच्
(D) ण्यत्

**59.** पवनस्य अपत्यं पुमान्–
(A) पावनः
(B) पावनिः
(C) पवनीयः
(D) पावनी

**60.** लक्ष्मीः अस्ति यस्य सः
(A) लक्ष्मीमान्
(B) लक्ष्मीवान्
(C) लक्ष्मीवत्
(D) लक्ष्मीमत्

**61.** मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः– इति श्लोक उपलभ्यते

(A) कुमारसम्भवे

(B) रघुवंशे

(C) महावीरचरिते

(D) प्रतिमानाटके

**62.** 'भाग्यायत्तमतः परं न खलु तद् वाच्यं वधूबन्धुभिः' – 'वधूबन्धुभिः' इत्यत्र कः समासः?

(A) बहुव्रीहिसमासः

(B) द्वन्द्वसमासः

(C) अव्ययीभावसमासः

(D) तत्पुरूषसमासः

**63.** 'तीर्थोदकं वह्निश्च नान्यतः शुद्धिमर्हतः' इति श्लोक उपलभ्यते–

(A) उत्तररामचरिते

(B) स्वप्नवासवदत्ते

(C) अभिज्ञानशकुन्तले

(D) हर्षचरिते

**64.** प्रसन्नराघवस्य रचनाकारः

(A) अश्वघोषः

(B) कृष्णमिश्रः

(C) जयदेवः

(D) शीलभद्रः

**65.** वक्रोक्तिजीवितस्य रचनाकारः

(A) नागार्जुनः

(B) जयदेवः

(C) मम्मटः

(D) कुन्तकः

**66.** सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीताय पतिंवरा सा– इति श्लोकः प्राप्यते–

(A) कुमारसम्भवे

(B) उत्तररामचरिते

(C) किरातार्जुनीये

(D) रघुवंशे

**67.** अधस्तनयुग्मानां समीचीनां तालिकां चिनुत–

| | | | |
|---|---|---|---|
| (a) | भिन्नरुचिर्हि लोकः | (1) | मेघदूतम् |
| (b) | याच्ञा मोघा वरमधिगुणे | (2) | रघुवंशम् |
| (c) | अनुभूयतां चिरं विचित्रो राजप्रासादः | (3) | मृच्छकटिकम् |
| (d) | रत्नं रत्नेन सङ्गच्छते | (4) | मुद्राराक्षसम् |

कूटः

| | (a) | (b) | (c) | (d) |
|---|---|---|---|---|
| (A) | (3) | (1) | (4) | (2) |
| (B) | (2) | (1) | (3) | (4) |
| (C) | (2) | (1) | (4) | (3) |
| (D) | (3) | (2) | (4) | (1) |

**68.** शिखरिणी इति छन्दसि गणा यथाक्रमं विद्यन्ते

(A) य–म–न–स–भ–ल–गाः

(B) म–न–य–स–म–ल–गाः

(C) य–म–न–भ–स–ल–गाः

(D) य–स–म–न–भ–ल–गाः

**69.** करूणरसस्य कः विशिष्टः कविः?

(A) कालिदासः

(B) शूद्रकः

(C) भवभूतिः

(D) भासः

**70.** रत्नावलीनाटिकायाः प्रधानरसः अस्ति

(A) वीररसः

(B) मधुररसः

(C) शान्तरसः

(D) शृङ्गाररसः

**71.** नाट्यशास्त्रानुसारत: रस: गृहीत:
(A) ऋग्वेदात्
(B) सामवेदात्
(C) यजुर्वेदात्
(D) अथर्ववेदात्

**72.** नाट्यशास्त्रे नाट्यमण्डपस्याकाशरक्षणार्थं नियुक्त: देव:
(A) वरूण:
(B) अग्नि:
(C) रुद्रा:
(D) इन्द्र:

**73.** नाट्यशास्त्रानुसारत: नाट्यशाला कतिविधा:?
(A) द्विविधा:
(B) त्रिविधा:
(C) चतुर्विधा:
(D) पञ्चविधा:

**74.** साहित्यदर्पणमते अर्थप्रकृतय: कतिविधा:?
(A) त्रिविधा:
(B) चतुर्विधा:
(C) पञ्चविधा:
(D) सप्तविधा:

**75.** मुद्राराक्षसे तृतीयाङ्कस्य नाम किम्?
(A) कृतकलह:
(B) राक्षसनिर्वेद:
(C) राक्षसनिग्रह:
(D) कृतककोप:

**76.** न प्रभातरलं ज्योतिरुदेति वसुधातलात्– इति कस्योक्ति:?
(A) महर्षिकण्वस्य
(B) दुष्यन्तस्य
(C) सारथे:
(D) प्रियंवदाया:

**77.** गुणा पूजास्थानं गुणिषु न च लिंगं न च __________ ।
(A) वय:
(B) मन:
(C) धनम्
(D) कृति:

**78.** ‘धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुति: दत्ता’– इति उक्ति:
(A) यजमानस्य
(B) ब्रह्मण:
(C) कण्वस्य
(D) दुष्यन्तस्य

**79.** हर्षचरिते कति उच्छासा सन्ति?
(A) पञ्च
(B) षट्
(C) सप्त
(D) अष्टौ

**80.** काव्यप्रकाशे अध्यायानां नाम
(A) उद्योत:
(B) पटल:
(C) उल्लास:
(D) परिच्छेद:

**81.** ‘सीतापरित्यागः’ वाल्मीकिरामायणस्य कस्मिन् काण्डे वर्तते?

(A) अरण्यकाण्डे

(B) सुन्दरकाण्डे

(C) उत्तरकाण्डे

(D) बालकाण्डे

**82.** अधस्तनेषु कस्य ग्रन्थस्य वाल्मीकिरामायणं न उपजीव्यम्?

(A) रघुवंशम्

(B) जानकीहरणम्

(C) सेतुबन्धमहाकाव्यम्

(D) शिशुपालवधम्

**83.** महाभारते अङ्गी रसः

(A) वीररसः

(B) करुणरसः

(C) शान्तरसः

(D) शृङ्गाररसः

**84.** श्रीकृष्णद्वैपायनस्य अपरं नाम–

(A) सूतः

(B) वेदव्यासः

(C) पराशरः

(D) मार्कण्डेयः

**85.** ‘मन्वन्तराणि’ कस्य लक्षणस्य अंशविशेषः?

(A) महाभारतस्य

(B) रामायणस्य

(C) मनुस्मृतेः

(D) पुराणस्य

**86.** मनुसंहितायां प्रजानां रक्षणं कस्य धर्मत्वेनोक्तम्?

(A) ब्राह्मणस्य

(B) वैश्यस्य

(C) क्षत्रियस्य

(D) शूद्रस्य

**87.** मनुसंहितामनुसृत्य रिक्तस्थानं पूरयत– ‘सुरेन्द्राणां ________ निर्मितो नृपः’।

(A) बलेभ्यो

(B) शक्तिभ्यो

(C) मात्राभ्यो

(D) बुद्धिभ्यो

**88.** मनुमते राजा स्वराष्ट्रे कीदृशः स्यात्?

(A) भृशदण्डः

(B) क्षमान्वितः

(C) अजिह्मः

(D) न्यायवृत्तः

**89.** कीदृशं दुर्गं मनुना विशिष्यते?

(A) धन्वदुर्गम्

(B) महीदुर्गम्

(C) गिरिदुर्गम्

(D) अब्दुर्गम्

**90.** मनुसंहितायां कामजव्यसनानि कति?

(A) सप्त

(B) अष्टौ

(C) नव

(D) दश

**91.** पैशुन्यं किम्?
(A) अविज्ञातदोषाविष्करणम्
(B) साधोर्बन्धनादिनिग्रह:
(C) परगुणासहिष्णुता
(D) परगुणेषु दोषाविष्करणम्

**92.** दूते आयत्तं किं नाम?
(A) दण्ड:
(B) वैनयिकी क्रिया
(C) कोषराष्ट्रे
(D) सन्धिविपर्ययौ

**93.** याज्ञवल्क्यस्मृत्यनुसारम् अर्थिना यथा आवेदितं तत् कस्य अग्रत: लेख्यम्?
(A) अधिकारिण:
(B) सचिवस्य
(C) मन्त्रिण:
(D) प्रत्यर्थिन:

**94.** याज्ञवल्क्यमतेन अर्थशास्त्रात् किं बलवत्तरम्?
(A) तर्कशास्त्रम्
(B) धर्मशास्त्रम्
(C) युद्धशास्त्रम्
(D) शब्दशास्त्रम्

**95.** प्रदीप: सर्वविद्यानामुपाय: _____________ ।– रिक्तस्थानं पूरयत
(A) सर्वकर्मणाम्
(B) सर्वधर्मणाम्
(C) सर्ववर्णानाम्
(D) सर्ववर्गाणाम्

**96.** इन्द्रियजय: केन उपायेन भवति?
(A) कामक्रोधत्यागात्
(B) लोभमानत्यागात्
(C) मदहर्षत्यागात्
(D) उपर्युक्तानां सर्वेषां त्यागात्

**97.** स्कन्दगुप्तस्य गिर्नार्शिलालेखस्य मुख्यविषय:
(A) राजप्रशस्ति:
(B) धर्मोपदेश:
(C) स्थानमाहात्म्यम्
(D) ह्रदवर्णनम्

**98.** अशोकस्य पञ्चमशिलालेखस्य प्राप्तिस्थानम् अस्ति
(A) सारनाथे
(B) गोरक्षपुरे
(C) मगधे
(D) दिल्लीनगर्य्याम्

**99.** खारबेलस्य हस्तिगुम्फाभिलेखस्य मुख्यविषय:
(A) धर्मोपदेश:
(B) अहिंसा
(C) स्थानवृत्तान्त:
(D) खारबेलस्य जीवनवृत्तान्त:

**100.** 'सोमपातम' इति कस्या वैदिकदेवताया: विशेषणम्?
(A) अग्निदेवताया:
(B) विष्णुदेवताया:
(C) रुद्रदेवताया:
(D) इन्द्रदेवताया:

**Space for Rough Work**

**Space for Rough Work**

**Space for Rough Work**

**Space for Rough Work**